# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०४** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – OE 233 (Old) | समयः –०२:०० तः ०५:०० |
| दिनाङ्कः – ०७/१२/२०१८ | ग्रन्थः – मन्त्रसंहिता | |

**प्रथमान्वितिः**

प्रश्नः १ निम्नाङ्कितेषु मन्त्रेषु द्वयोः व्याख्या कार्या । १०

(१) मानस्तोकेतनये मानऽआयुषिमानो गोषुमानोऽअश्वेषुरीरिषः।
मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वाहवामहे ॥

(२) अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन।
ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवसिनीम् ॥

(३) गणानान्त्वागणपतिँ हवामहे प्रियाणान्त्वाप्रियपतिँ हवामहे निधीनान्त्वानिधिपतिँ हवामहे व्वसोमम।
आहमजानिगर्भधमात्त्वमजासिर्भधम् ॥

प्रश्नः २ प्रश्नमेकं विशदं समन्त्रकं वर्णयत। १०

(१) सन्ध्यायाः महत्त्वं प्रतिपाद्य सन्ध्यामन्त्राणां विवेचनं कुरुत।

(२) तर्पणस्य महत्त्वं प्रतिपाद्य पितृमन्त्राणां प्रतिपादनं कुरुत।

**द्वितीयान्वितिः**

प्रश्नः ३ निम्नलिखितमन्त्रेषु द्वयोः व्याख्या कार्या । १०

(१) इदं विष्णुर्विचक्रमेत्रेधानि दधे पदम्।
समूढमस्यपाँ सुरेस्वाहा॥

(२) आ नो भद्राः क्रतवो यन्तुव्विश्वतोदब्धासोऽअपरीतासऽ उद्भिदः।
देवानो यथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारो दिवे दिवे ॥

(३) तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमनो हविर्भिः।
आहेडमानोव्वरुणोहवोध्युरुशँ समानऽआयुः प्रमोषीः ॥

प्रश्नः ४ प्रश्नमेकं विशदं समन्त्रकं वर्णयत। १०

(१) प्राणप्रतिष्ठायाः महत्त्वं प्रतिपाद्य प्रतिष्ठामन्त्राः प्रतिपादनीयाः।

(२) मङ्गलयापाठस्य महत्त्वं प्रतिपाद्य मङ्गलमन्त्रपाठमन्त्राः प्रस्तूयन्ताम् ॥

**तृतीयान्वितिः**

प्रश्नः ५ निम्नलिखितमन्त्रेषु द्वयोः व्याख्या कार्या। १०

(१) त्वाङ्गन्धर्वाऽअखनंस्त्वामिन्द्रस्त्वाम्बृहस्पतिः।
त्वामोषधेसोमोराजाव्विद्वान्यक्ष्मादमुच्यत॥

(२) अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत।

अस्तोषतस्वभानवोव्विप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥

(३) ओषधीः प्रतिमोदद्ध्वम्पुष्पवतीः प्रसूवरीः ।
अश्वाऽइवसजित्त्वरीर्वीरुधः पारयिष्ण्वः ॥

प्रश्नः ६ अधस्तनाभ्यां प्रश्नमेकं समन्त्रकं प्रतिपादयत। १०

(१) क्रमशः षोडशोपचारान् विलिख्य धूप-दीप-नैवेद्य-ताम्बूलमन्त्राः प्रस्तूयन्ताम्।

(२) आरर्तिकं मन्त्रपुष्पाञ्जलिञ्च महत्त्वं प्रतिपाद्य उभयोः मन्त्रयोः व्याख्यां कुरुत।

प्रश्नः ७ एकेन वाक्येनोत्तरं यच्छत (दशैव) १०

(१) उद्वयन्तमिति सूर्योपस्थानमन्त्रस्य कः ऋषिः ?
(२) गायत्रीमन्त्रस्य छन्दः कः ?
(३) उत्तमा संध्या कदा भवति ?
(४) काम्पीलवासिनीम् का वर्तते ?
(५) कलशस्य दक्षिणे कस्य वेदस्य पूजा भवति ?
(६) कलशस्य मूले कस्य देवस्य वासः अस्ति ?
(७) अग्निर्ज्योतिर्ज्योतिः.............कस्य मन्त्रः अस्ति ?
(८) मन्त्रसंहिता कस्य वेदस्य भागः अस्ति ?
(९) मार्जनमन्त्रः कः अस्ति ?
(१०) पवित्रीधारणं केन मन्त्रेण भवति ?
(११) नैवेद्यम् अमृतिकरणार्थं का मुद्रा करणीया ?
(१२) केन मन्त्रेण नीराजनं प्रज्वालनीयम् ?
(१३) जपान्ते कतिमुद्राः प्रदर्शनीयाः ?
(१४) सूर्यस्य प्रायश्चिताघ्र्यमन्त्रः कः ?
(१५) देवस्य दक्षिणा केन मन्त्रेण दातव्या ?

***